# Shri Ramakrishna Ashtottarashata Nama Stotram

# શ્રીરામકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shri Ramakrishna Ashtottarashata Nama Stotram

File name : rAmakRRiShNAShTottarashatanAmastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTottarashatanAma, stotra

Location : doc_deities_misc

Author : Tryambaka Sharma

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

જયતુ જયતુ વાઞ્છા કલ્પશાખી સશિષ્યઃ
 સ જયતુ ભગવાન્ યઃ સદ્ગુરુ રામકૃષ્ણઃ ।
જયતુ ચ જનની શ્રી શારદા ભક્તિદાત્રી
 વિમલ ચરણ રેણં દીનભક્તઃ પ્રયાચે ॥ ૧॥

ત્રિતાપનાશકો દેવઃ પુનઃ પતિત પાવનઃ ।
બ્રહ્માવિષ્ણુર્મહેશસ્ત્વં નિર્ગુણોઽસિ નિરઞ્જનઃ ॥ ૨॥

લોકંવિલોક્ય સકલં કામાર્થતમસાવૃતમ્ ।
ઉદિતસ્ત્વં સમુદ્ધર્તું તરુણારુણ સારથિઃ ॥ ૩॥

પુત્રરૂપેણાવતીર્ય, ક્ષુદિરામ ગૃહેઽકરોઃ ।
જગત્કલ્યાણ સિદ્ધ્યર્થં સર્વધર્મ સમન્વયમ્ ॥ ૪॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૫॥

"મતાનુસારં પન્થાનં" – તત્ત્વં નવમિદં પુનઃ ।
સ્વયમાચરતા યેન ધર્મદ્વન્દ્વં વિનાશિતમ્ ॥ ૬॥

ભક્તેર્જ્ઞાનસ્ય યોગસ્ય, કર્મણશ્ચ સમન્વયાત્ ।
કૃતં નૃહરિણા યેન સસમ્ભવમસમ્ભવમ્ ॥ ૭॥

ૐ જનકેન ગયાસ્વપ્નાદ્ ગદાધર૧ ઇતીરિતઃ
ચન્દ્રાદેવ્યા "ગદાઈ"રતિ દુલાલેત્યઉબ્રવીદ્ધ્વની ॥ ૮॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૯॥

અન્નપ્રાશન સંસ્કારે રામકૃષ્ણેજતિ નામતઃ ।
તાતેનાકારિતઃ પ્રેમ્ના, સ્વયં ચાન્તેઽબ્રવીદિદમ્ ॥ ૧૦॥

સ્વામિનાયં વિવેકેન પૂજિતઃ શતનામભિઃ ।
પઠનાચ્છ્રવણાદ્વાપિ યેષાં તુષ્યતિ માનસમ્ ॥ ૧૧॥

નિરઞ્જનોપ નિર્ગુણશ્ચ૬ ગુણેઢ્યો૭ ગુણજિત્૮ પ્રભુઃ૯ ।
દેવો૧૦ નરવર૧૧શ્ચાપિ નરરૂપધરઃ૧૨ શિવઃ૧૩ ॥ ૧૨॥

રામકૃષ્ણઃ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૧૩॥

ભવવૈદ્યો૧૪ દીનબન્ધુ૧૫ર્ભવભેદા૧૬ કરોઽચલઃ૧૭ ।
ગોષ્પદીકૃત૧૮ સંસાર સાગરો ભવતારણઃ૧૯ ॥ ૧૪॥

શાન્તો૨૦ વાઙ્મનસાતીતઃ૨૧ સમદૃક્૨૨ જગદીશ્વરઃ૨૩ ।
ૐ૨૪-સ્વરૂપો હ્રીં૨૫-સ્વરૂપો નિર્ભયઃ૨૬ કરુણાઘનઃ૨૭ ॥ ૧૫॥

ભગવાન્૨૮ જ્યોતિષાં જ્યોતિર૨૯ર્ધર્મ સંસ્થાપકઃ૩૦ પુનઃ ।
અવતારવરિષ્ઠો૩૧ઽપિ સર્વધર્મસ્વરૂપકઃ૩૨ ॥ ૧૬॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૧૭॥

મર્ત્યામૃતં૩૩ ત્યક્તજાતિ૩૪ કુલાહન્ધીઃ સુનિર્મલઃ૩૫ ।
ત્યાગીશ્વરઃ૩૬ પરિત્યક્ત કામકાઞ્ચન ભાવનઃ૩૭ ॥ ૧૮॥

યુગાવતારો૩૮ જગતાં જન દુઃખનિવારણઃ૩૯ ।
જગત્-ત્રાણાર્પિતપ્રાણઃ૪૦ કાલબન્ધનમોચનઃ૪૧ ॥ ૧૯॥

શ્રીજી૪૨ ગુણમય૪૩શ્ચાપિ મરણોર્મિ વિનાશકઃ૪૪ ।
જ્ઞાનાઞ્જન૪૫ પવિત્રાક્ષઃ પાપ દૂષણનાશનઃ૪૬ ॥ ૨૦॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૨૧॥

નિન્દિતે૪૭ન્દ્રિયરાગોઽપિ, યશ્ચ યોગસહાયવાન્૪૮ ।
સન્દેહ-રાક્ષસહન્તા૪૯, ભક્તાર્ચિતપદઃ૫૦ પુનઃ ॥ ૨૨॥

સકલેષ્વર્પિતપ્રેમા૫૧, વિજૃમ્ભિત યુગેશ્વરઃ૫૨ ।
પ્રેમરત્નાકરઃ૫૩ પૂર્ણો૫૪ દુખગઞ્જનભઞ્જનઃ૫૫ ॥ ૨૩॥

કઠોરકર્મકૃત્૫૬, સર્વદેવદેવીસ્વરૂપકઃ૫૭ ।
વેદમૂર્તિ૫૮ર્બહુકૃતઃ૫૯ “ષણ્ાન્તઃ”૬૦ પ્રાણસખા૬૧ ગુરુઃ૬૨ ॥ ૨૪॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૨૫॥

અદ્વૈતતત્ત્વ બોધાબ્ધિ૬૩–સમાહિતમનાઃ સ્વયમ્ ।
પ્રોલ્લ૬૪સદ્ભક્તિયોગાસ્ય–પટાવૃત સુવૃત્તવાન્ ॥ ૨૬॥

શરણં૬૫ શક્તિ સિન્ધૂદ્દ૬ત્થ-તરઙ્ગઃ કરુણાનિધિઃ૬૭ ।
જગતા૬૮મેકગમ્યોઽસૌ, નિત્યં૬૯ કર્મકલેવરઃ૭૦ ॥ ૨૭॥

મોહ૬ષો૭૧ મનોવાચામેકાધાર૭૨સ્તમોહરઃ૭૩ ।
ભાસ્વરો૭૪ ભાવપાથોધિ૭૫-ર્દૃઢનિશ્ચય માનસઃ૭૬ ॥ ૨૮॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૨૯॥

જગદ્ભૂષણ૭૭ ઇત્થં ચિદ્ઘનકાય૭૮સ્તથા સ્તુતઃ ।
ઋતસ્વરૂપો૭૯ ભક્તાનાં, નિર્હેતુશરણં૮૦ સદા ॥ ૩૦॥

નરદેવો૮૧ ગુરુમહારાજો૮૨ વિગતસંશયઃ૮૩ ।
જગ૮૪દ્વન્દનયોગ્યાત્મા, ભવબન્ધન ખણ્ડનઃ૮૫ ॥ ૩૧॥

અહેતુઃ૮૬ કરુણામૂર્તિઃ સુવિતીક્ષ્ણોવિશાલધીઃ૮૭ ।
સર્વવ્યાપી૮૮ સાક્ષીરૂપો૮૯ યઃ સનાતનપૂરુષઃ૯૦ ॥ ૩૨॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૩૩॥

આદર્શજીવનઃ૯૧ સર્વસમ્પ્રદાયાધિનાયકઃ૯૨ ।
સામ્ય૯૩મૈત્રી-દિવ્યદૂતો૯૪ઽદ્ભુતમૂર્તિ૯૫રુદારધીઃ ॥ ૩૪॥

નરનારીભેદશૂન્યો૯૬ વેદાન્તોજ્જ્વલભાષ્યભૂઃ૯૭ ।
સમદૃક્૯૮ પણ્ડિતાઽજ્ઞેષુ, માયામુગ્ધદયાપરઃ૯૯ ॥ ૩૫॥

રામકૃષ્ણ૧૦૦ સ્વરૂપેણ અવતીર્ણઃ પુરુષો મહાન્ ।
મહાસમન્વયાચાર્યઃ૧૦૧ ખ્યાતઃ પરમ-ઈશ્વરઃ૧૦૨ ॥ ૩૬॥

રામકૃષ્ણ! કૃપાસિન્ધો ! શરણાગતવત્સલ ! ।
દેહિ દીને ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૩૭॥

પ્રાક્ પ્રત્યક્ સંસ્કૃતેરાસ્તે, યઃ સમન્વયરૂપવાન્ ।

વિશ્વધર્મપ્રકાશકઃ૧૦૩ પૂજ્યો લોકોત્તરઃ૧૦૪ પુમાન્ ॥ ૩૮॥

વન્દિતઃ શારદાદેવ્યા૧૦૫ પૂર્ણબ્રહ્મ સનાતનઃ ।
માઁ કાલી૧૦૬ ઠાકુરશ્ચાપિ૧૦૭ યઃ સદાનન્દપૂરુષઃ૧૦૮ ॥ ૩૯॥

“પૂર્ણાવતાર”૧૦૯ ઇત્યં યઃ શિષ્ય સન્દેહ શાન્તયે ।
યો રામો૧૧૦ યશ્ચ કૃષ્ણોઽભૂદ્રામકૃષ્ણોઽધુનાઽબ્રવીત્ ॥ ૪૦॥

રામકૃષ્ણ ! કૃપાસિન્ધો ! શરણાગતવત્સલ ।
દેહિ દીને, ભક્તિહીને, નિત્યં દાસ્યમતિં પ્રભો ॥ ૪૧॥

નામાન્યાષ્ટોત્તરશતં પઠતાં પ્રીતિપૂર્વકમ્ ।
ભવચિન્તા વિપન્નાનાં શાન્તિઃ શાશ્વતિકી ભવેત્ ॥ ૪૨॥

ઇતિ શ્રીત્ર્યમ્બકશર્મણા વિરચિતં
“શ્રીશ્રીરામકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રં” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Ashtottarashata Nama Stotram*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*